कर्द्दमोऽकीर्त्तिः कलङ्कः कृष्णवर्णकः। अन्धकारः केशसमोपच्छतिस्योपमानकम्। अकीर्त्तेः कृष्णवस्तूनि मालिन्यं तमसां ततिः। कस्तूरिकाया भ्रमरो नीलकान्तमणिर्घनः। सुगन्धिद्रव्यदाहोत्थधूमः कज्जलकं तथा। कृष्णपुष्पप्रभृतयः कामाकीर्त्तिः स्थलान्तरे। कामिनोरयशस्तद्वत् कज्जलस्यापि तानि च। कर्पूरस्य तथा चन्द्रः शशाङ्ककिरणस्तथा। यूथिकाकुन्दकुसुमं विरहिगण्डकस्तथा। हिण्डीरपिण्डः प्रथित उपमानतया भुवि। मनोरथस्य विज्ञेयः फलपुष्पादियुक्तरुः। कविबुद्धिकल्पना स्यादानन्दस्य सुधार्णवः। ब्रह्मसाक्षात्कृतिस्तद्वत्, कामिनीदर्शनस्य तु। अतिप्रियतमप्राप्तिर्ब्रह्मसाक्षात्कृतिस्तथा। सुधारसो नित्यसुखसाक्षात्कारस्तथा मतः। पूर्णचन्द्रादिकस्यापि साक्षात्कारः प्रकीर्त्तितः। अमृतस्य तु सत्काव्यं कामिन्यधरपानकम्। ब्रह्मसाक्षात्कृतिस्तद्वत्, विषस्याथ प्रकीर्त्त्यते। साध्वीस्त्री विरहः पापं मलिनं दुःखदं च यत्। शीताग्निः शीतकालीनशीतोदं परिकीर्त्तितम्। व्यभिचारिणी च या नारी सापि तद्वत् प्रकीर्त्तिता। विरहस्याग्निराधिश्च यातना च पयोनिधिः। दुःखदानि च वस्तूनि तप्तानि कथितानि च। पुष्पाणां कामिनी चन्द्रः कर्पूरस्य यशस्तथा। चन्द्रस्य प्रमदावक्त्रमतिशुभ्रस्य यद्भवेत्। यशः पुण्यादिकं वस्तु चोपमानतयेष्यते। सूर्य्यस्य शिवनेत्राग्निः काञ्चनस्याहरस्तथा। बाडवाग्निर्जवापुष्पं वसन्तोत्थपलाशकः। पद्मस्य कामिनीवक्त्रं पाटलं रक्तवस्तु च। इन्दीवरस्य कस्तूरी नीलकान्तमणिस्तथा। कामिनीनयनं तद्वत् कैरवस्य तु चन्द्रमाः। कुन्दादिपुष्पमन्यच्च शुभ्रवर्णञ्च यद्भवेत्। राम इन्द्रः कुबेरश्च चन्द्रमा भास्करस्तथा। नलप्रभृतयो ये तु प्रसिद्धाश्चक्रवर्त्तिनः। मेघस्य काली कृष्णश्च नीलपाथोजसंहतिः। इन्दीवरं वनं दाता कृष्णार्थी भ्रमरावली। यशसश्च चन्द्रादिशुक्लवर्णपदार्थकाः। कन्दर्पस्य नलश्चन्द्र आश्विनौ च पुरूरवाः। दीपस्यार्चिस्स्यकञ्च प्रतापः शालकं तथा। वायोः शीघ्रगवस्तूनि कीर्त्तितानि पुरातनैः। अश्वस्य वायुर्हरिणो मनश्च, हस्तिनो गिरिः। सेवस्तमालवृक्षश्च तमसाञ्च समुच्चयः। सौधस्योच्चैःश्रवाश्चन्द्रः कैलासैरावतौ मतौ। शिवस्य सौधवत् सर्वं कृष्णस्य सजलो घनः। तमालवृक्षो भ्रमरश्चेन्दीवरकं नभः। नीलकान्तमणिर्नीलपद्मं रामस्य पूर्ववत्। नवदूर्वादलं वृक्षपल्लवं चाश्विकं पुनः। लक्ष्म्यास्तु पार्वती चन्द्रकान्तिः सीता रतिस्तथा। द्रौपदी पद्मकान्तिश्च पुराणैः परिकीर्त्तिता। सरस्वत्याश्चन्द्रकला कैलासाचलकान्तयः। शुक्लवर्णपदार्थाश्च, विपक्षेस्तु समुद्रकः। ब्रह्माण्डं पण्डितमनस्तथा नारायणोदरम्। समुद्रस्य च मेघादि वस्तु कृष्णं च यद्भवेत्। विदुरस्य भारतस्य तथापस्मारिरोमवान्। पुरस्य स्वर्णः कैलासो यत् इहत् स्यात् मनोरमम्। रथस्य पृथ्वी वैकुण्ठपुरी पोतश्च पुष्पकम्। कामिन्यास्तु तडित्तारा स्वर्णवर्णा च केतकी। उपमानतया स्वर्णलतापि परिकीर्त्तिता। नायकस्य तु कन्दर्प ऐलश्चन्द्रोऽश्विनौ तथा। सभायास्तु सुधर्मा स्यात् गङ्गा सूर्य्यस्य मण्डलम्। गण्डकी पर्वतो मेरुरुपमानतया मतः। पण्डितस्य सुराचार्य्य ऋषिः शुक्रः सरस्वती। श्रीरामस्तु विरहिणः शिवोऽजो दुःखितो जनः। उन्मत्तश्चन्दनतरुः शिवशेखरचन्द्रमाः। वाड़वाग्नियुताब्धिश्च वल्मीकोऽहीन्दुशेखरः। दाता कर्णः कल्पवृक्षः कामधेनुरुशीनरः। रोहणोऽब्धिरवद्वलो जैमिनिश्च युधिष्ठिरः। वसन्तर्त्तौ मतं मद्यमुन्मादो मलयानिलः। यमोऽग्निर्विषसर्पौ च स स्यात् विरहिणं प्रति। ग्रीष्मर्त्तौरग्निर्विरहोऽहिनिश्वासस्तथा पुनः। विरहिणाञ्च निश्वास उपमानतया मतः। वर्षर्त्तौ रजनी व्योम नारायणसमुद्रकाः। शरदः काशपुष्पादिरूपशीतांशुचामराः। ऐरावतगजा ज्ञेया उपमानतया बुधैः। शीतर्त्तौरुपमानं स्यात् राज्यभ्रष्टस्तु भूपतिः। तथापस्माररोगाढ्यो विद्भिः परिकीर्त्तितः। शिशिरर्त्तौस्तु गुणिनः समुद्रोऽद्रिर्धराश्विनौ। राजागमनकालश्च मदनोऽपि मतो विदाम्। सचिवस्योपमानं तु सुराचार्य्यः प्रकीर्त्तितः"।

**साधक** त्रि॰ साध—ण्वुल्, सिध—णिच्—ण्वुल् साधादेशः वा। १साधनकर्त्तरि २कारके तन्त्रोक्ते ३मन्त्रादिसिद्धिकारके शिष्ये च "साधकः सिद्धिमाप्नुयात्" इति तन्त्रम्। स्त्रियां टाप् अत इत्त्वम्। साधिका सा च ४दुर्गायां "साधनात् सिद्धिरित्युक्ता साधिका वाऽथ ईश्वरी" देवीपु॰४५ अ॰। ५जन्मतारावधिकेषु षष्ठपञ्चदशचतुर्विंशनक्षत्रेषु पु॰ "जन्मसम्पद्विपत् क्षेम प्रत्यरिः साधको वधः। मित्रं परममित्रञ्च जन्मर्क्षात् गणयेत् त्रिधा" ज्यो॰त॰। ६अनुमापके लि॰।